ससम्भ्रमः । इति श्रीधरस्वामी । यथा, भागवते । ३ । १८ । ५ ।
"तं व्यग्रचक्रं दितिजाधमेन
स्वपार्षदमुख्येन विषज्जमानम् ।")
पुं, विष्णुः । यथा,—
"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ।"
इति तस्य सहस्रनामस्तोत्रम् ।

व्यङ्गः, पुं, (विगतानि अङ्गानि यस्य ।) भेकः । इति मेदिनी । (विगतानि अङ्गानि यस्मात् ।) मुखरोगविशेषः । तस्य लक्षणं यथा,—
"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः ।
मुखमागम्य सहसा मण्डलं विसृजत्यतः ।
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ॥"
इति माधवकरः ॥ * ॥
तस्य चिकित्सा ।
"वटाङ्कुरा मसूराश्च प्रलेपाद्व्यङ्गनाशनः ।
व्यङ्गे मञ्जिष्ठया लेपः प्रशस्तो मधुयुक्तया ॥
अथवा लेपनं शस्तं शशस्य रुधिरेण च ।
जातीफलस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम् ॥
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ।
कुष्ठं कालीयकं लोध्रं एभिर्लेपं प्रयोजयेत् ॥"
इति भावप्रकाशः ।
(त्रि, विगतं अङ्गं यस्य ।) हीनाङ्गः । इति मेदिनी । (यथा, महाभारते । ९ । ३६ । २० ।
"यद्यैनमपि मातस्त्वं मामिवाङ्गविभेदनात् ।
न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम् ॥")

व्यङ्ग्यः, त्रि, व्यञ्जनया बोध्योऽर्थः । यथा,—
"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥"
इति साहित्यदर्पणे २ परिच्छेदः ।

व्यच, श व्याजे । सम्बन्धे । इति कविकल्पद्रुमः ॥ (तुदा०-कुटा०-पर०-सक०-सेट् ।) व्याजश्छलः । श, विचति सतं खलः । छलयतीत्यर्थः । अविचीत् विव्याच । इति दुर्गादासः ॥

व्यजः, पुं, (व्यजत्यनेनेति । वि + अज + "गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति घञ् । निपातनादजेर्व्यघञपोरिति वीभावो न भवति ।) व्यजनम् । विपूर्व्वाजधातोरल्प्रत्ययेन निष्पन्नमिदम् ।

व्यजनं, क्ली, (व्यजत्यनेनेति । वि + अज + ल्युट् । 'वा यौ ।' २।४।५७। इति पक्षे वीभावो नास्ति ।) तालवृन्तकम् । इत्यमरः । पाखा इति भाषा । (यथा, ऋतुसंहारे । १ । ८ ।
"सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सुप्त इवाद्य मन्मथः ॥")
अस्य सामान्यगुणः । मूर्च्छादाहतृष्णाघर्म्मश्रमनाशित्वम् । तालव्यजनगुणः । त्रिदोषशमनत्वम् । लघुत्वञ्च । वंशव्यजनगुणः । रूक्षत्वम् । उष्णत्वम् । वायुपित्तकारित्वञ्च । वेत्रवस्त्रमयूरपुच्छव्यजनगुणः । त्रिदोषनाशित्वम् । बालव्यजनगुणः । तेजस्करत्वम् । मक्षिकादिनिवारकत्वञ्च । इति राजवल्लभः ॥

व्यञ्जकः, पुं, (व्यनक्तीति । वि + अन्ज + ण्वुल् ।) अभिनयः । इत्यमरः ॥ हृद्गतक्रोधादिभावाभिव्यञ्जके । व्यनक्तीति व्यञ्जकः । अन्ज ञ ञि गति म्रक्षणे णकः । आङ्गिकसात्त्विकवाचिकाहार्य्यभेदात् व्यञ्जकश्चतुर्व्विधः । अभिमुखं नीयते अर्थोऽनेन इति अभिनयः । णी ञ प्रापणे अल् । हस्तादिभिः शस्त्रघातादिसूचनमभिनयः । घटाद्याकारसूचकं करादिसंस्थानमभिनयः इत्यन्येऽपि । इति भरतः ॥ व्यञ्जनया प्रतिपादकः । (यथा, साहित्यदर्पणे ।२।११।
"अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥"
प्रकाशके, त्रि । यथा, मनुः । २ । ६८ ।
"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत ॥")

व्यञ्जनं, क्ली, (व्यज्यते म्रक्ष्यते अन्नादि संयोज्यतेऽनेनेति । वि + अञ्ज + ल्युट् ।) अन्नोपकरणम् । तत्तु सूपशाकादि । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । तेमनम् २ निष्ठानम् ३ । इत्यमरः ॥ तेमः ४ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ८ । ६७ । २ ।
"आनो भर व्यञ्जनं गामश्वमभ्यञ्जनम् ॥")
अस्य गुणाः ।
"व्यञ्जनं शाकमत्स्याख्यं हृद्यं रुच्यञ्च पुष्टिदम् ।
द्रव्येण येन येनेह व्यञ्जनं मत्स्यमांसयोः ।
तस्य तस्य तयोस्तेनद्गुणदोषैर्विभावयेत् ॥"
इति राजवल्लभः ।
व्यञ्जनविशेषगुणाः तत्तच्छब्दे द्रष्टव्याः ॥ * ॥ चिह्नम् । (व्यञ्जना । यथा, साहित्यदर्पणे ।३।५८।
"अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥")
श्मश्रु । (यथा, महाभारते । १ । १५८ । ३४ ।
"कृत एव परित्यक्तुं सुतं शक्याम्यहं स्वयम् ।
बालमप्राप्तवयसमजातव्यञ्जनाकृतिम् ॥")
अवयवः । दिनम् । इति मेदिनी ॥ स्त्रीपुंसयोरगुह्यदेशः । स तु उपस्थः । अर्द्धमात्रकम् । स तु ककारादिहकारान्तवर्णः । इति धरणिः ॥ (यथा, साहित्यदर्पणे । १० । ६४० ।
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥")

व्यञ्जना, स्त्री, (वि + अञ्ज + णिच् + युच् । टाप् ।) शब्दस्य वृत्तिविशेषः । तस्या लक्षणं यथा,—
"विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥"
शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभाव इति नयेनाभिधा लक्षणा तात्पर्य्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु ययान्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जन-ध्वनन-गमन-प्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम । तत्र ।
"अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ॥"
अभिधामूलामाह ।
"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥"
आदिशब्दादिप्रयोगादयः । उक्तं हि ।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"
इति ॥
सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते । अशङ्खचक्रो हरिरिति तद्वियोगेन तमेव । भीमार्ज्जुनाविति अर्ज्जुनः पार्थः । कर्णार्ज्जुनाविति कर्णः सूतपुत्रः । स्थाणुं वन्दे भवच्छिदे इति स्थाणुः शिवः । सर्व्वं जानाति देव इति देवो भवान् । कुपितो मकरध्वज इति मकरध्वजः कामः । देवः पुरारिरिति पुरारिः शिवः । मधुना मत्तः पिक इति मधुर्वसन्तः । पातु वो दयितामुखमिति मुखं सांमुख्यम् । विभाति गगने चन्द्रः इति चन्द्रः शशी । निशि चित्रभानुरिति चित्रभानुर्वह्निः । भाति रथाङ्गमिति नपुंसकव्यक्त्या रथाङ्गं चक्रम् । स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य इति तस्य विषये नोदाहृतम् । इदञ्च केऽप्यसहमाना आहुः स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव । उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेवेति । एतद्विषये उदाहरणमुचितमेव इति तन्न तथाहि स्वराः काक्वादय उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम् । किञ्च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः न च तथा अतएवाहुः श्लेषनिरूपणप्रस्तावे काव्यमार्गे स्वरो न गण्यते इति च नय इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण । आदिशब्दादेतावन्मात्रस्तनीत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम् । एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः सा अभिधामूला व्यञ्जना । यथा मम तातपादानां महापात्रचतुर्द्दशभाषावारविलासिनीभुजङ्गमहाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम् ।
"दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः ।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् ।
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥"
अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपो-